# प्रपञ्चमिथ्यात्वानुमानखण्डनम्

विमतं मिथ्या दृश्यत्वात् यदित्थं तत्तथा यथा सम्प्रतिपन्नम् । इत्युक्ते जगतोऽभावादाश्रयासिद्धः पक्षः। अनिर्वचनीयासिद्धेरप्रसिद्धविशेषणः । सदसद्वैलक्षण्ये मिथ्यात्वे सिद्धसाधनता ।

दृश्यत्वाभावादसिद्धो हेतुः । अनिर्वचनीयासिद्धेरेव । अनिर्वचनीयासिद्धेरेव सपक्षाभावाद्विरुद्धः । आत्मनोऽपि दृश्यत्वादनैकान्तिकः । जगतोऽभावे अनुमानस्याप्यभाव इति तर्कबाधितत्वेन अनध्यवसितः ।

प्रत्यक्षादिविरुद्धत्वाद्विश्वं सत्यमित्यादिवाक्यविरुद्धत्वाच्च कालात्ययापदिष्टः । रजतं दृष्टमितिभ्रममात्रत्वात् विमतं सत्यं दृश्यत्वादात्मवदित्यपि प्रयोज्यत्वात्प्रकरणसमः । विमतं सत्यं प्रमाणदृष्टत्वात् यदित्थं तत्तथा यथात्मा इतिप्रयोगात् सप्रतिसाधनः ।

शुक्तिरजतस्याप्यनिर्वचनीयत्वाभावात्साध्यविकलो दृष्टान्तः । उक्तप्रकारेण दृश्यत्वाभावात्साधनविकलश्च प्रमाणविरुद्धत्वमुपाधिः । साध्यविपरीतधर्मविशिष्टः पक्षः । साध्यसमानधर्मविशिष्टः सपक्षः । साध्यविपरीतधर्मविशिष्टो विपक्षः । पक्षवचनं प्रतिज्ञा । लिङ्गं हेतुः । निदर्शनं दृष्टान्तः ।

**यो दृश्यते सदानन्दनित्यव्यक्ततिदात्मना ।**
**निर्दोषाखिलकल्याणगुणं वन्दे रमापतिम् ।।**

**इति श्रीमदानन्दतीर्थभगवत्पादाचार्यवितचितं प्रपञ्चमिथ्यात्वानुमानखण्डनं सम्पूर्णम्**